लोचना, स्त्री, (लोचते पर्य्यालोचयतीति। लोच + ल्युः। टाप्।) बुद्धशक्तिभेदः। अस्याः प्रमाणं पर्य्यायाश्च लोकेश्वरात्मजाशब्दे द्रष्टव्याः॥

लोचनामयः, पुं, (लोचनयोरामयः।) चक्षूरोगविशेषः। तत्पर्य्यायः। अभिमन्थः २। इति त्रिकाण्डशेषः॥

लोचनी, स्त्री, (लोच्यतेऽसौ। लोच्+ल्युट्। ङीप्।) महाश्रावणिका। इति राजनिर्घण्टः॥

लोचमर्कटः, पुं, लोचमस्तकः। इत्यमरटीकायां स्वामी॥

लोचमस्तकः, पुं, (लोचं दृश्यं मस्तकं मयूरशिखेव यस्य।) मयूरशिखौषधम्। रुद्रजटा इति ख्यातः। चैत्रयमानिकेति केचित्। तत्पर्य्यायः। खराश्वा २ कारवी ३ दीप्यः ४ मयूरः ५। इत्यमरः॥ लोचमर्कटः ६। इति भरतः॥

लोचिका, स्त्री, दधिघृतमर्द्दितोष्णोदकसद्धितदलितमण्डलाकारनिर्म्मितघृतभृष्टसमिता। लुचि इति भाषा। इति शाकराजेश्वरः॥

लोट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अलुलोटत्। लोटति लोकः उन्माद्यतीत्यर्थः। इति दुर्गादासः॥

लोटुलः, पुं, (लोटतीति। लोट्+बाहुलकात् उलच्।) अभिलोटकः। इति संक्षिप्तसारोणादिवृत्तिः॥

लोड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अलुलोड़त्। इति दुर्गादासः॥

लोणखं, क्ली, (लोणं लवणरसयुक्तं तृणम्।) लवणतृणम्। इति राजनिर्घण्टः॥

लोणा, स्त्री, (लवणमस्त्यस्या इति। अच्। टाप्। पृषोदरादित्वात् साधुः।) चुक्राम्लिका। इति राजनिर्घण्टः॥ (तथास्याः पर्य्यायः।
"लोणा लोणी च कथिता बृहल्लोणी तु
घोटिका।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

लोणारं, क्ली, (लवणं ऋच्छतीति। लवण+ऋ+अण्। पृषोदरादित्वात् साधुः।) क्षारविशेषः। तत्पर्य्यायः। लवणोत्थम् २ लवणाकरजम् ३ लवणमदः ४ जलजम् ५ लवणक्षारः ६ लवणः ७। अस्य गुणाः। अत्युष्णत्वम्। तीक्ष्णत्वम्। पित्तवृद्धिकारित्वम्। क्षारत्वम्। ईषल्लवणत्वम्। वातगुल्मादिशूलनाशित्वञ्च। इति राजनिर्घण्टः॥

लोणाम्ला, स्त्री, चुक्राम्लिका। इति राजनिर्घण्टः॥

लोतं, क्ली, (लुनातीति। लू+"हसिमृग्रिणिति।" उणा० ३। ८६। इति तन्।) लोप्त्रधनम्। तत्पर्य्यायः। लोप्त्रम् २। इति जटाधरः॥ लोप्त्री ३ लोत्रम् ४ लुम्पम् ५। इति शब्दरत्नावली॥

लोतः, पुं, क्ली, (लुनातीति। लू+"हसिमृग्रिणिति।" उणा० ३।८६। इति तन्।) नेत्राम्बु। इति त्रिकाण्डशेषः॥ चिह्नम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ लवणम्। अश्रुपातः। इति संक्षिप्तसारोणादिवृत्तिः॥

लोत्रं, क्ली, (लूनातीति। लू+"सर्व्वधातुभ्यष्ट्रन्।" उणा० ४। १५८। इति ष्ट्रन्। यद्वा, ला+"अशित्रादिभ्य इत्रोत्रौ।" उणा० ४। १७२। इति उत्रः। इत्युज्ज्वलः।) लोतम्। इति शब्दरत्नावली॥ नेत्रजलम्। इति संक्षिप्तसारोणादिवृत्तिः॥

लोधः, पुं, (रुणद्धीति। रुध+अच्। रस्य लः।) स्वनामख्याततरुः। रक्तवर्णस्य तस्य पर्य्यायः। तिरीटः २ मार्ज्जनः ३ रक्तः ४ लोध्रः ५ तिल्वकः ६। श्वेतस्य तस्य पर्य्यायः। शुक्लः २ शावरलोध्रः ३ महालोध्रः ४ शावरः ५। इति रत्नमाला॥ अस्य गुणाः। अस्रकफवातनाशित्वम्। चक्षुष्यत्वम्। शोथजित्त्वम्। सरत्वञ्च। इति राजवल्लभः॥

लोध्रः, पुं, (रुणद्धीति। रुध+बाहुलकात् रन्। रस्य लः।) लोधवृक्षः। (यथा, शिशुपालवधे। ८। ४६।
"अधरेष्वलक्तकरसः सुदृशां
विशदं कपोलभुवि लोध्ररजः।
नवमञ्जनं नयनपङ्कजयो-
र्विभिदे न शङ्कनिहितात् पयसः॥")
तत्पर्य्यायः। गालवः २ शावरः ३ तिरीटः ४ तिल्वः ५ मार्जनः ६। इत्यमरः॥ षट् लोध्रमात्रे लोध इति ख्याते। षट् श्वेतलोध्र इति सुभूतिः॥ आद्यपादः श्वेतलोध्रे शेषो रक्तलोध्र इति स्वामी॥ तस्य पर्य्यायान्तरं यथा। लोध्रः ७ भिल्लतरुः ८ तिल्वकः ९ काण्डकीलकः १० लोध्रकवृक्षः ११ शम्बरः १२ हस्तिरोध्रकः १३ तिलकः १४ काण्डनीलकः १५ हेमपुष्पकः १६ भिल्ली १७ शावरकः १८। अस्य गुणाः। कषायत्वम्। शीतत्वम्। वातकफास्रनाशित्वम्। चक्षुष्यत्वम्। विषहृत्त्वम्। तत्र विशिष्टो वल्कलोध्रकः। इति राजनिर्घण्टः॥ अपि च।
"लोध्रस्तिल्वस्तिरीटश्च शावरो गालवस्तथा।
द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः॥
जीर्णपत्रो बृहत्पत्रः पट्टीलाक्षाप्रसादनः।
लोध्रो ग्राही लघुः शीतश्चक्षुष्यः कफपित्तनुत्।
कषायो रक्तपित्तासृग्वातातीसारशोथहृत्॥"
इति भावप्रकाशः॥
(तथा च।
"तिल्वकस्तु मतो लोध्रो बृहत्पत्रस्तिरीटकः।
तस्य मूलत्वचं शुष्कामन्तर्वल्कलवर्ज्जिताम्॥
चूर्णयेत्तु त्रिधा कृत्वा द्वौ भागौ गालयेत्ततः।
लोध्रस्यैव कषायेण तृतीयं तेन भावयेत्॥
भागं तं दशमूलस्य पुनः क्वाथेन भावयेत्।
शुष्कं चूर्णं पुनः कृत्वा तत ऊर्द्ध्वं प्रयोजयेत्॥
दधितक्रसुरामण्डमूत्रैर्वदरशीधुना।
रसेनामलकानां वा ततः पाणितलं पिबेत्॥"
"सुरां लोध्रकषायेण जातां पक्षस्थितां पिबेत्॥"
इति चरके कल्पस्थाने नवमेऽध्याये॥)

लोध्रकवृक्षः, पुं, (लोध्र एव लोध्रकः। स एव वृक्षः।) लोधः। इति राजनिर्घण्टः॥

लोपः, पुं, छेदः। व्याकुलीभावः। लुपधातोर्भावे घञ्प्रत्ययेन निष्पन्नोऽयम्। (अभावः। यथा, रघुः। १। ६८।
"सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः॥")
व्याकरणमते वर्णनाशः। तथा हि। नाशविधिर्यथा। लोपोऽव्योमाडोरित्यादि॥ अपि च।
"सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्ब्बली॥"
इति दुर्गादासः॥

लोपा, स्त्री, अगस्त्यमुनिपत्नी। इति जटाधरः॥

लोपाकः, पुं, (लोपं शीघ्रमदर्शनं अकति प्राप्नोतीति। अक्+अण्।) शृगालः। इति त्रिकाण्डशेषः॥ (यथा, सुश्रुते। १। ४६।
"श्वाविच्छल्यकगोधाशशवृषदंशलोपाकलोमशकर्णकदलीमृगप्रियकाजगरसर्पमूषिकनकुलमहावभ्रुप्रभृतयो विलेशयाः॥")

लोपापकः, पुं, (लोपं द्रुतमदर्शनं आप्नोतीति। आप्+ण्वुल्।) शृगालः। इति शब्दमाला॥

लोपापिका, स्त्री, (लोपापक+स्त्रियां टाप्। अत इत्वम्।) शृगाली। इति शब्दमाला॥

लोपामुद्रा, स्त्री, अगस्त्यमुनिभार्य्या। इत्यमरः॥ लोपयति योषितां रूपाभिधानमिति लोपा पचाद्यन् आमुद्रयति स्वः स्वष्टिमिति आमुद्रा अन् ततः कर्म्मधारयः। किंवा न मुदं राति अमुद्रा पतिशुश्रूषाया लोपे अमुद्रा लोपामुद्रा। लोपा च।
"लोपामुद्रा तु वैदर्भी लोपा स्त्री कुम्भजन्मनः॥"
इति कण्ठभूषणम्। इति भरतः॥*॥
अस्या अर्घ्यदानप्रसङ्गेन अगस्त्यार्घ्यदानं लिख्यते। अगस्त्यार्घ्यदानन्तु सौरेण विंहराशौ विधानात्। यथा, ब्रह्मवैवर्त्ते।
"अप्राप्ते भास्करे कन्यां शेषभूतैस्त्रिभिर्दिनैः।
अर्घ्यं दद्युरगस्त्याय गौड़देशनिवासिनः॥"
नारसिंहे।
"शङ्खे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतम्।
मन्त्रेणानेन वै दद्याद्दक्षिणाशामुखस्थितः॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भव।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते॥"
प्रार्थनन्तु।
"आतापिर्भक्षितो येन वातापिश्च महासुरः।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु॥"
गन्धादिकन्तु अगस्त्याय नम इत्यनेन देयं विशेषानुद्देशो सामान्यतः प्राप्तत्वात्।
दक्षिणाशामुखस्थित इति गन्धादावपि प्रयोगाङ्गकर्तृधर्म्मत्वादिति रत्नाकरः॥*॥
तत्पत्न्यर्घ्यदानमन्त्रस्तु।
"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते।
गृहाणार्घ्यं मया दत्तं मैत्रावरुणिवल्लभे॥"
इति मलमासतत्त्वम्॥